शास्त्रि तृतीय खण्डस्य कृते (साहित्यम्)
साहित्यदर्पणः सप्तम परिच्छेदः

---

रसानां विरोध प्रकाराः के ? तत्समावेशस्य एकस्मिन् पद्ये कथं कर्तुं युक्तया शक्यते इति प्रतिपादनम् ।

---

ननु 'आद्यः करुण, रौद्र, वीर, भयानकैः' इति उक्तत्वेन विरोधिनोः वीर शृङ्गारयोः कथम् एकत्र —

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥'

इत्यादौ समावेशः ?

अत्रोच्यते — इह एवं मीमांसा व्यतिकर सन्तौ, खलु रसानां विरोधितायाः अविरोधितायाश्च त्रिधा व्यवस्था —
(1) कयोश्चित् आलम्बनैक्येन,
(2) कयोश्चित् आश्रयैक्येन,
(3) कयोश्चित् आनन्तर्येण ।

तत्र वीर शृङ्गारयोः आलम्बनैक्येन विरोधः । यथा= आलम्बनैक्येन हास्य रौद्र बीभत्सैः सम्भोग शृङ्गारस्य, वीर करुण रौद्र भयानक बीभत्सैः विप्रलम्भ शृङ्गारस्य, आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः । नैरन्तर्य विभावैक्याभ्यां शान्त शृङ्गारयोः । त्रिधा अपि विरोधो वीरस्याद्भुत रौद्राभ्याम् । शृङ्गारस्य अद्भुतेन, भयानकस्य बीभत्सेन इति ।

तेनात्र 'कपोले जानक्याः' इत्यस्मिन् पद्ये वीर शृङ्गारयोः भिन्न आलम्बनत्वात् न विरोधः । एवञ्च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबन्धे भिन्नाश्रयत्वेन न विरोधः । यच्च नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र 'अहो गीतमहो वादित्रम्' इति अद्भुतस्य अन्तरा निवेशनात् न आनन्तर्याभावात् न शान्त शृङ्गारयोः विरोधः । एवम् अन्यद् अपि ज्ञेयम् ।

अलमतिविस्तरेण ।

---

उपेन्द्र झा
14/6/21
असो० प्रो० साहित्य
रा० उ० सं० महावि०
कुरकेला, मुरैना

शास्त्रि द्वितीय खण्डस्य कृते साहित्यम्
साहित्य दर्पणः प्रथम परिच्छेदः

तात्पर्य वृत्ति व्यञ्जनाया तादात्म्य निराकरणम् ।

ननु अभिहितान्वयवादिभिः अङ्गीकृता तात्पर्याख्या वृत्तिरेव अर्थं च व्यङ्ग्यार्थं बोधयतीति चेत्, न । अभिहितान्वय बोधने परिक्षीणायाः तस्या व्यङ्ग्यार्थं बोधने असमर्थत्वात् । यथा धनिकेन उक्तम् —

'तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ॥' इति

तन्न समञ्जसम् । तस्योपरि 'शब्द बुद्धि कर्मणां विरम्य व्यापाराभावः' इति वादिभिरेव पातनीयो भवद्भिः ।

यत्तु धनञ्जय — 'पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वे अनुपादेयत्वात् उन्मत्त वाक्यवत् (अप्रामाण्यं स्यात्) तस्मात् काव्यशब्दानां निरतिशय सुख आस्वाद व्यतिरेकेण प्रतिपाद्य प्रतिपादकयोः प्रवृत्ति प्रयोजनान्तर अनुपलब्धेः निरतिशय सुखास्वाद एव कार्यत्वेन अवधार्यते । 'यत्परः शब्दः स शब्दार्थः' इति न्यायात् । इति । तत्र प्रष्टव्यम् — किमिदं तत्परत्वं नाम, तदर्थत्वं वा तात्पर्येण तद्बोधकत्वं वा? आद्ये न विवादः व्यङ्ग्यत्वेऽपि तदर्थतानपायात् । द्वितीये तु केयं तात्पर्यं वृत्तिः । अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा? आद्ये दत्तमेवोत्तरम् (अन्वयबोधमात्रे) परिक्षीणायाः तस्या व्यङ्ग्यार्थ बोधकत्वाभावेन । द्वितीये तु नाम मात्रे विवादः । तन्मतेऽपि तुरीय वृत्ति सिद्धेः ।

ननु एतत्तु भूतार्थेव तात्पर्य शक्त्यो क्रियादि संसर्गस्य विधेयस्य प्रकाशनम् इति चेत् न । तयोः क्रियादि संसर्गबोध रसादि बोधयोः हेतुफलभावाङ्गीकारात् । यदाह मुनिः 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति । सहभावे च कुतः सव्येतर विषाणयोरिव कार्यकारणभावः? पौर्वापर्यभावात् । अतो न तात्पर्य वृत्त्या व्यञ्जनाया गतार्थत्वमिति दिक् ।

उपेन्द्र झा
14/6/20
व्या० प्रो० साहित्य
रा० उ० सं० महा०
[illegible]

शास्त्री प्रथम खण्डस्य कृते साहित्यम्
(साहित्य दर्पणः द्वितीयः परिच्छेदः)

---

वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः
इयं कारिकायाः साधु व्याख्या।

---

आचार्य विश्वनाथेन काव्य लक्षणे 'वाक्यं रसात्मकं काव्यम्' इति प्रोक्तम्। तत्र किं नाम वाक्यं इति अपेक्षायां आह — 'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' इति। योग्यतादि त्रयात्मकः पद समूह एव वाक्यमित्यर्थः। तत्र योग्यता — 'पदार्थानां परस्पर सम्बन्धे बाधाभावः' एक पदार्थस्य अपर पदार्थेन सह सम्बन्धे बाधाऽभाव एव योग्यता। यथा — 'गामानय' इत्यत्र गो पदार्थस्य आनय पदार्थेन सह यः सम्बन्धः स बाधितो न वर्तते इति योग्यतायाः सत्त्वाद् वाक्यत्वं भवति। न च बाध-स्थलेऽपि यत्र पदार्थानां परस्परं सम्बन्धो वर्तते तत्रापि वाक्यत्वं स्यादिति वाच्यम्। तथा सति 'वह्निना सिञ्चति' इत्यस्यापि वाक्यत्वं स्यात्। नहि अग्निः सेचन क्रियायां समर्थः, अपितु दहन क्रियायाम्। अतो नेदं वाक्यम्।

आकाङ्क्षा — एक पदार्थस्य अपरपदार्थेन सह अन्वय अपेक्षा आकाङ्क्षा। सा च श्रोतुः जिज्ञासा रूपा, यथा 'देवदत्तो ग्रामं याति' इत्यत्र गच्छतीति पदस्य निराकाङ्क्षत्वे वाक्यत्वे गौः अश्वः, पुरुषो, हस्ती इति परस्परं निरपेक्षस्य पद समूहस्यापि वाक्यत्वं स्यात्। एवं च अतिव्याप्तिः स्यात्। अत्र गवादि अर्थबोधक सुबन्त पदं श्रवणानन्तरम् अश्वादि पदान्तर श्रवणेच्छा विरहस्य सिद्धत्वात् आकाङ्क्षा शून्यत्वम्। अतो नेदं वाक्यम्।

आसत्तिः — यस्य पदार्थस्य येन पदार्थेन सह सम्बन्धापेक्षा तेन सह तस्य अव्यवधानेन स्थितिः आसत्तिः। व्यवहितेऽपि इदानीमुच्चरितस्य देवदत्त शब्दस्य दिनान्तरोच्चरितेन गच्छति इति पदेन सङ्गतिः स्यात्। किन्तु ईदृशेन पद समूहेन न भवति बोधः, आसत्ति विरहात्, न चेदं वाक्यम्।

व्यवधानं द्विविधम् — एकं कालव्यवधानम्, अपरं च अनुपयुक्त पदानां पठनम्। तत्र काल व्यवधानस्य उदाहरणं पूर्वं उक्तम्। द्वितीयस्य तु 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति। अत्र 'गिरिरग्निमान्', देवदत्तेन भुक्तम् इति सम्बन्धः उचितेतिदिक्।

---

उपेन्द्र झा
14/6/14
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरकैला, [illegible]